# Advice of Swami Vivekananda (200)

# સ્વામિવિવેકાનન્દોપદેશદ્વિશતિઃ

## Document Information

Text title : vivekAnandopadeshadvishatI

File name : vivekAnandopadeshadvishatI.itx

Category : deities_misc, gurudev, dvishatI

Location : doc_deities_misc

Author : Tryambak Bhandarkar

Transliterated by : Sunder Hattangadi

Proofread by : Sunder Hattangadi

Latest update : March 21, 2018

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 22, 2022

*sanskritdocuments.org*

Advice of Swami Vivekananda (200)

# સ્વામિવિવેકાનન્દોપદેશદ્વિશતિઃ

અવતારઃ

સ્થાપકાય ચ ધર્મસ્ય સર્વધર્મસ્વરૂપિણે ।
અવતારવરિષ્ઠાય રામકૃષ્ણાય તે નમઃ ॥ ૧॥

રામકૃષ્ણાવતારે તુ સ્થિતં સર્વમનન્તકમ્ ।
અનન્તપ્રેમ, ભક્તિશ્ચાનન્તા,જ્ઞાનમનન્તકમ્ ॥ ૨॥

સહસ્રયુગપર્યન્તં યલ્લબ્ધં વિશ્વહિન્દુભિઃ ।
રામકૃષ્ણેન તલ્લબ્ધમેકસ્મિન્નેવ જન્મનિ ॥ ૩॥

સર્વજાતીયવેદાનાં રામકૃષ્ણસ્ય જીવનમ્ ।
વિદ્યતે ભાષ્યરૂપં તદ્વેદાર્થાનાં પ્રકાશને ॥ ૪॥

કસ્યાપિ દેશસ્ય ગતેતિહાસે
ન તાદૃશો ધર્મસમન્વયોઽસ્તિ ।
પ્રત્યક્ષમીશઃ ખલુ રામકૃષ્ણો
લઘુર્મતોઽસ્ય ત્વવતારવાદઃ ॥ ૫॥

યસ્મિન્દિનેઽસૌ નરજન્મ લેભે
તસ્માદ્દિનાત્સત્યયુગં પ્રવૃત્તમ્ ।
ભેદા વિવાદાસ્ત્વખિલા વિનષ્ટાઃ
અસ્પૃશ્યવર્ગઃ પ્રિયતામુપેતઃ ॥ ૬॥

લુપ્તો હિન્દુખ્રિસ્તમોહમ્મદીય-
બૌદ્ધાદીનાં ભેદભાવઃ સમન્તાત્ ।
એકો વર્ણો વેદ એકોઽધુનાસ્તે
શાન્તિસ્થાનં નૂતનં ભારતં નઃ ॥ ૭॥

“ભક્તિજ્ઞાને કર્મયોગૌ સમેત્યા-
ભેદઃ સમ્પદ્યેત સદ્ભાવનાનામ્ ।

જાયેતૈવં નઃ સમાજો નવીનઃ”
પ્રેષ્ઠઃ શ્રેષ્ઠશ્ચાવતારોપદેશઃ ॥ ૮॥

“વિશ્વાસોઽસ્તુ” ગુરોર્વાચિ નિશ્ચિતા ભારતોન્નતિઃ ।
કર્તવ્યાઃ સુખિનઃ સર્વે નિઃસ્વાઃ સાધારણા જનાઃ ॥ ૯॥

દેશભક્તિઃ

ઉમાનાથસ્તવોપાસ્યઃ સર્વત્યાગી ચ શઙ્કરઃ ।
ધનજીવનસૌખ્યાનિ ન સન્ત્યાત્મસુખાય તે ॥ ૧૦॥

બલિસ્વરૂપો જનિતોઽસિ માતુ-
શ્છાયા વિરાજસ્તવ યઃ સમાજઃ ।
વિપન્નચણ્ડાલ દરિદ્રમૂર્ખા-
સ્ત્વદ્રક્તમાંસાન્વિતબાન્ધવાસ્તે ॥ ૧૧॥

ઉચ્ચૈર્વચો બ્રૂહિ સધૈર્યગર્વો
“ભ્રાતા મદીયઃ ખલુ ભારતીયઃ ।
સ બ્રાહ્મણો વાસ્ત્વથવાતિશૂદ્રઃ
સ નિર્ધનો વાસ્તુ નિરક્ષરો વા ॥ ૧૨॥

મમેશ્વરો ભારતદેવદેવ્યો
માતુઃ શુભં યત્કુશલં મદીયમ્ ।
દત્ત્વા બલં મે બલિની પુનસ્ત્વં
માં માતરિત્થં પુરુષં વિધેહિ ॥ ૧૩॥

ગ્રસ્યતે મૃત્યુના જન્તુરેકવારં સ્વજીવને ।
માતુરુન્નતયે તસ્માત્સાહસં કુરુ સાહસમ્ ॥ ૧૪॥

દ્યૌરુત્તમા ભારતભૂર્મમેયં
દોલાસ્વરૂપા મમ બાલ્યકાલે ।
યૂનસ્તથા સુન્દરનન્દનં ચ
વારાણસીયં મમ વૃદ્ધભાવે ॥ ૧૫॥

તૂષ્ણીં રહઃ સિક્તતુષારસમ્પત્
સમ્પર્કતઃ પાટલ-કુઞ્મલાનામ્ ।
વિકાસવત્ વિશ્વચારધારાં,
પ્રભાવિતા ભારતભાવવૃન્દૈઃ। ॥ ૧૬॥

આપ્લાવ્યતે વિશ્વમદમ્યશક્ત્યા
    વિના નિનાદં ખલુ ભારતેન ।
ધ્રુવં નવીનં યુગમાવિરાસ્તે
    ન જ્ઞાયતે તુ પ્રભવઃ કુતસ્ત્યઃ ॥ ૧૭ ॥

નાશોન્મુખં નઃ કિમુ ભારતં સ્યા-
    દહો તદાધ્યાત્મિકતાવિનાશઃ ।
ગતા ધ્રુવં ધર્મસહાનુભૂતિ-
    ર્મૃતા સદાચારવાર્તા ! ॥ ૧૮ ॥

વિનાશિતાદર્શજગત્પ્રભાવતા
    પ્રતિષ્ઠિતા ચાશુ વિલાસિતા ભવેત્ ।
પ્રતારણા પાશવિકં બલં વિધિ-।
    ર્ધનં પુરોધા બલિરસ્મદાત્મન ! ॥ ૧૯ ॥

ન ભારતં રુદ્ધસમુન્નતિ સ્યા-
    ન્ન ચૈતિ નિદ્રાવશતામિદાનીમ્ ।
શક્તિઃ પુનઃ કાલમિમં વિજેતું।
    સન્ત્યક્તનિદ્રઃ ખલુ કુમ્ભકર્ણઃ ॥ ૨૦ ॥

ઊર્જસ્વિકાલાયસનિર્મિતાભિ-
    ર્વજ્રં વપુઃ સ્નાયુશિરાભિરસ્તુ ।
સેવાર્થમસ્મત્પ્રિયમાતૃભૂમે-
    રીહા બલં ચાસ્તુ યદ્વિતીયમ્ ॥ ૨૧ ॥

અનેન સદ્યત્નપરા ભવેમ
    પ્રાપ્તું વયં વિશ્વરહસ્યબોધમ્ ।
ઉદન્વદન્તસ્તલમભ્યુપેમ
    પ્રાણવ્યયેનાપ્યુદયાર્થસિદ્ધ્યૈ ॥ ૨૨ ॥

કાલોઽયં કઠિનશ્રમસ્ય ભવતો ભ્રાતર્વચઃ શ્રૂયતા-
    મુત્થાય દ્રુતમારભસ્વ સમયે મન્યેઽતિનિદ્રા તવ ।
માતા પ્રાપ્તનિજાસના બલવતી તન્દ્રાભિભૂતા મનાક્
    તસ્યા આયતિરુજ્જ્વલા પરમસૌ યુષ્મત્પ્રયત્નાશ્રયા ॥ ૨૩ ॥

ભવિષ્યન્મહદ્ભારતં કર્તુમીહા
    યદિ સ્યાદુપાયત્રયં સંવિધેયમ્ ।

અદમ્યં બલ નિર્મિતિઃ સઙ્ઘશક્તે-
    ર્વિકીર્ણા સમીહા તથૈકત્વસૂત્રા ॥ ૨૪॥

આયાન્તુ મિત્રાણિ ભવન્તુ વીરા
    બહિર્વિનિર્ગત્ય નિજાન્ધકૂપાત્ ।
વિધાય દૃષ્ટિં પરિતો વિશાલાં
    પશ્યન્તુ રાષ્ટ્રાણિ કથં પ્રયાન્તિ ॥ ૨૫॥

પ્રેમાસ્તિ ચેન્માનવજાતિમાત્રે
    સ્વજન્મભૂમૌ ચ તથા ત્વદીયમ્ ।
આયાહિ ગન્તું પુરતો ન પશ્ચાદ્
    યતામહે સત્તમલક્ષ્યસિદ્ધ્યૈ ॥ ૨૬॥

તુદન્તુ સુહૃદઃ સર્વે રુદન્તુ તવ બાન્ધવાઃ ।
શ્રેયસી ન ગતિઃ પશ્ચાન્નિત્યમગ્રગતિર્ભવેઃ ॥ ૨૭॥

ઉપેક્ષ્યતે યજ્જનતાજનાર્દનો
    મહત્તદંહઃ ક્રિયતે નિરન્તરમ્ ।
ધ્રુવં હિ તન્નઃ પતનસ્ય કારણં
    ન વિસ્મરાતો જનતાસમુન્નતિમ્ ॥ ૨૮॥

નિષ્ફલા રાજનીતિઃ સ્યાત્સમુદાયકૃતેન યા ।
તત્તચ્છિક્ષાન્નવાસાનામુપાયાન્ પરિચિન્તયેત્ ॥ ૨૯॥

ન તાદૃશે વિશ્વસિમીશ્વરેઽહં
    યો મહ્યમન્નં ન દદાતિ ભૂમૌ ।
પ્રયોજનં સ્વર્ગસુખેન કિં મે
    શિક્ષાન્નશૂન્યા યદિ ભારતીયાઃ ॥ ૩૦॥

ઈર્ષ્યાં દ્વેષં પરિત્યજ્ય સહાન્યૈર્ભવ સોદ્યમઃ ।
સ્વદેશબન્ધુવર્ગાર્થમિદમાવશ્યકં પરમ્ ॥ ૩૧॥

ઉત્થાય ધારય ધુરં ત્વરિતં જગત્યાં
    જાનાસિ જીવિતમિદં ક્ષણભઙ્ગુરં તે ।
જાતોઽસિ યત્કિમપિ લક્ષ્મ ત્યજ સ્વકીયં
    જાતાઃ સ્થિતાઃ કતિ ન વા પશવો મ્રિયન્તે ॥ ૩૨॥

ભયં પુત્ર! પરિત્યજ્યાનિશમગ્રેસરો ભવેઃ ।

નિર્ભીકા એવ શોભન્તે નરાઃ કેસરિણો યથા ॥ ૩૩॥

વિમુક્ત્યૈ દેશસ્ય પ્રયતનપરોઽથાસ્ય જગતો
ભવ, ત્વય્યેવાસ્તે શ્ૃણુ સકલસેવાભરધૃતિઃ ।
ઉદેત્વન્તર્જ્યોતિઃ સતતમધિજીવાત્મનિહિતં
રુચિર્વેદાન્તસ્ય પ્રતિગૃહમિદાનીં પ્રવિશતુ ॥ ૩૪॥

આદૌ સમાલ્પાવિતમસ્તુ ભાવૈ-
રાધ્યાત્મિકૈરરુન્નતભારતં નઃ ।
તતોઽનુ સામાજિક રાજકીય-
વિચારધારાભિરુદેતુ કાર્યમ્ ॥ ૩૫॥

આજીવનં ભવત કાર્યપરા, ભવત્સુ
સ્થિત્વાદ્ય મૃત્યુમનુ ચાપિ ભવેન્મમાત્મા ।
આયાતિ યાતિ નનુ પાર્થિવજીવનં નો
નિત્યાનિ કિં વિભવમાનયશઃસુખાનિ ? ॥ ૩૬॥

દ્વાવેવ ભવદાદર્શૌ સેવા ત્યાગસ્તથા તયોઃ ।
ચેદ્ ભારતેન તાદાત્મ્યં શેષં સમ્પત્સ્યતે સ્વયમ્ ॥ ૩૭॥

અભિલષસિ યદિ ત્વં ભારત! સ્વાં સમૃદ્ધિં
વિકિર જગતિ સર્વં રત્નજાતં સ્વકીયમ્ ।
અપરજનપદેભ્યઃ પ્રાપ્તુમિચ્છેર્યદુચ્ચં
ગ્રહણમથ ચ દાનં લૌકિકો ધર્મમાર્ગઃ ॥ ૩૮॥

પ્રત્યગ્ગતૌ યદભવન્મમ હાર્દપાત્રં
તીર્થં પવિત્રમધુના મમ ભારતં તત્ ।
પ્રત્યાગતોઽત્રજરજઃ શિરસા વહામિ
પુણ્યો વહન્નિહ વિભાતિ કથં સમીરઃ ॥ ૩૯॥

વિશ્વાસો બલં ચ

અનન્તં બલમેવ સ્યાત્પરો ધર્મઃ પરેશ્વરઃ ।
દૌર્બલ્યં પરિહર્તવ્યં દાસ્યેન ચ સહાત્મનઃ ॥ ૪૦॥

બલં જીવનં દુર્બલત્વં ચ મૃત્યુ-
ર્બલં શાશ્વતં સ્યાદલં સિદ્ધિબીજમ્ ।
બલં સૌખ્યકૃદ્ દુર્બલત્વં ચ દુઃખં

બલાન્યર્જયધ્વં બલાન્યજયધ્વમ્ ॥ ૪૧॥

“બદ્ધોઽસ્મિ મૂર્ખોઽસ્મિ ચ દુર્બલોઽસ્મિ”
ત્વયોચ્યતે ચેત્તવ દુર્ભગત્વમ્ ।
દૌર્બલ્યચિન્તા ન સખે વિધેયા
પ્રત્યાત્મસંસ્થં બલમાવિરસ્તુ ॥ ૪૨॥

બલં પરં જીવનમાર્ગદર્શકં
ક્રિયાપ્રધાને જગતીહ સર્વશઃ ।
પરિત્યજેર્દુર્બલતાનુસારતાં
સમુદ્યમે સા પ્રતિબન્ધિકા યતઃ ॥ ૪૩॥

શ્રદ્ધત્ત યૂયં મમ વીરમિત્રા-
ણ્યત્રાગતા ઉન્નતકાર્યહેતોઃ ।
ક્ષુદ્રશ્વશબ્દાદથવાપિ વજ્રા-
દભીરવઃ કર્મ નિજં કુરુધ્વમ્ ॥ ૪૪॥

તેજસ્વિનો જના અદ્ધા શ્રદ્ધાવન્તો બલાન્વિતાઃ ।
નિર્મલાન્તા અપેક્ષ્યન્તે પુરુષાસ્તુ સપૌરુષાઃ ॥ ૪૫॥

સર્વેઽપિ દોષાઃ પ્રભવન્ત્યશક્તે-
રશક્તિરંહઃકરણેઽપિ શક્તા ।
સ્વાર્થસ્ય મૂલપ્રભવોઽપ્યશક્તિ-
સ્તથૈવ લોકાઃ કલહે પ્રવૃત્તાઃ ॥ ૪૬॥

ભ્રાતર્વૃથાયં ભવદશ્રુપાત-
સ્ત્વય્યેવ નાસ્તે નિહિતં બલં કિમ ? ।
સ્વાં ચેદ્વિજાનાસિ બલિષ્ઠ! શક્તિમ્ ।
સર્વં જગત્ત્વત્પદલગ્નમેવ ॥ ૪૭॥

સપ્રેમભાવૈઃ સબલૈર્મનુષ્યૈઃ
સત્યાનુરાગૈરધુનાસ્તિ કાર્યમ્ ।
પ્રતારકૈઃ કિં ક્રિયતે સુકાર્યં
તસ્માત્સખે દર્શય પૌરુષં તે ॥ ૪૮॥

શૈત્યં ક્ષુધા પાર્થિવજીવનં ચ
ન કિઞ્ચિદીશો બલનાયકો નઃ ।

અદમ્યવિશ્વાસસહાનુભૂતી
    આસ્તાં પુરસ્તાદનિશં પુરસ્તાત્ ॥ ૪૯॥

કદાપિ પશ્ચાન્ન વિલોકનીયં
    ચિન્ત્યં ન “કર્તવ્યપથે પતેત્કઃ” ।
નિત્યં વયં ભોઃ પુરતો વ્રજામઃ
    કશ્ચિત્પતત્યન્યતરોઽભ્યુપૈતિ ॥ ૫૦॥

અસીમધૈર્યં ચ સમુદ્યમશ્ચ
    મહાંશ્ચ કાર્યક્ષમતા ગુણોઽપિ ।
આજ્ઞાકરત્વં મિલિતાનિ સન્તિ
    વ્યક્તેશ્ચ રાષ્ટ્રસ્ય યશસ્કરાણિ ॥ ૫૧॥

અપેક્ષ્યતે વ્યક્તિબલિષ્ઠતાદૌ
    શ્રદ્ધાથ લક્ષ્યં પ્રતિ તત્પરત્વમ્ ।
એતત્સમગ્રં ત્વયિ વિદ્યતે ચે-
    ત્કશ્ચ્યાવયેત્ત્વાં નિજકાર્યમાર્ગાત્ ॥ ૫૨॥

ત્યાગઃ દાનશીલતા ચ
શ્રૂયતાં નિશ્ચિતે મૃત્યાવાદર્શોઽસ્તુ મહાંસ્તવ ।
વરં મૃત્યુમુખે વાસો મહાદર્શસ્ય પાલને ॥ ૫૩॥

વિકિરતિતરાં કોઽસ્મિંલ્લોકે પ્રકાશપરમ્પરાં ?
    ગતયુગગતો ધર્મસ્ત્યાગઃ પુનઃ સમુદેષ્યતિ ।
જગતિ સદયાઃ સ્વાત્મોત્સર્ગપ્રસક્તહૃદો ધ્રુવં
    બહુજનહિતશ્રદ્ધા બુદ્ધાઃ શતં પ્રભવન્તપિ ॥ ૫૪॥

નિસ્વાર્થઃ સર્વદા કર્મણ્યધિકં ફલમશ્નુતે ।
તથા ત્વાચરણં કર્તું નરા ધૈર્યં ન કુર્વતે ॥ ૫૫॥

આસ્તે જીવનમેવ ભઙ્ગુરમિદં તુચ્છોઽભિમાનસ્તથા
    યત્સાંસારિકભોગજાતમખિલં નાનાવિલાસાન્વિતમ્ ।
યો જીવેદપરાર્થસાધનકૃતે તસ્યૈવ જન્મોજ્જ્વલં
    પ્રાણન્તોઽપિ મૃતોપમાઃ ખલુ નરા યે સ્વાર્થિનઃ કેવલમ્ ॥ ૫૬॥

કલ્યાણાય સ્વરાષ્ટ્રમ્ય સર્વસ્ય જગતસ્તથા ।
સ્વાત્મોત્સર્ગવિધેરયન્મહત્કાર્યં ન વિદ્યતે ॥ ૫૭॥

હિન્દો સ્વાભાવિકી શ્રદ્ધા જીવિતં શાશ્વતં તવ ।
તદર્થં ચિન્તિતઃ કસ્માત્કલ્યાણં જગતાં વરમ્ ॥ ૫૮॥

કલ્યાણં જગતાં વિધાતુમનિશં વાઞ્છન્તિ યે સજ્જના-
રતે સમ્પત્સુખલાભમાનયશસામીહાં ત્યજન્તુ દ્રુતમ્ ।
તેષાં પોટ્ટલિકાં વિધાય સહસાऽગાધે ક્ષિપન્ત્વમ્બુધૌ
કુર્વન્ત્વીશપદામ્બુજં સ્વશરણં વાક્યં સતામીદૃશમ્ ॥ ૫૯॥

ઔદાર્યં પ્રિયતાપિ જન્તુષુ ભવેન્મિત્રેષ્વમિત્રેષુ ચ
સ્વાન્તેऽનન્તસહાનુભૂતિરનિશં દુઃખાભિભૂતે જને ।
સદ્વિદ્યાધનસમ્પદન્વિતનરેऽસૂયાનિવૃત્તિસ્તતથા
દોષાવિષ્કરણાદ્વિરક્તિરપરસ્યૈતત્સતાં લક્ષણમ્ ॥ ૬૦॥

સેવા
પ્રતિષ્ઠિતશ્ચારુશરીરમન્દિરે
ત્વયાત્મદેવઃ સતતં નિષેવ્યતામ્ ।
પ્રભુર્ન ચેત્ત્વં પ્રભુમત્ર સેવિતું
પ્રયોજનં તેऽસ્તિ કિમન્યમન્દિરૈઃ ॥ ૬૧॥

નારીં નરં ચાખિલજીવલોકં
સેવસ્વ નારાયણભાવતસ્ત્વમ્ ।
દયાપ્રદાને નનુ કોऽસિ તેષાં
સેવાપ્રદાનં ચર ધર્મમર્મ ॥ ૬૨॥

શિવં સખે વન્દિતુમીહસે ચિરં
શિવાત્મજાનાં ક્રિયતાં સમર્ચનમ્ ।
સમ્પૂજયેદ્યઃ પરમેશપુત્રકાન્
સ એવ સાક્ષાજ્જગદીશપૂજકઃ ॥ ૬૩॥

દુર્ભિક્ષદુઃખગદપીડિતલોકશોકં
હર્તું પ્રયાત ભુવને ભુવનેશતુષ્ટ્યૈ ।
પ્રાણવ્યયાદપિ જનાઃ સુખિનઃ ક્રિયન્તાં
જાતા હિ પશ્યત વૃથા શતશો મ્રિયન્તે ॥ ૬૪॥

ઉચ્ચૈઃ સ્થિતઃ કરગુહીતપણો વિનોદા-
ન્મા બ્રૂહિ “ભિક્ષુક ગૃહાણ દયાપરોऽહમ્ ।”
દાતા ભવત્યુપકૃતોऽત્ર પરં ગ્રહીત્રા

સૌભાગ્યમેતદિહ તે સ્વસહાયકર્તુઃ ॥ ૬૫॥

ઈશઃ સ્થિતો દલિતદુર્બલદુઃખિતેષુ
યેઽર્હન્તિ સેવનમલં પ્રિયબાન્ધવાસ્તે ।
તાન્મૃગયસે કથમોશમન્યં
ગઙ્ગાતટે ખનિતુમિચ્છતિ કોઽપિ કૂપમ્ ॥ ૬૬॥

યાવજ્જનાઃ સન્તિ સહસ્રશોઽન્યે
શિક્ષાવિહીનાશ્ચ બુભુક્ષિતાશ્ચ ।
અર્થે ન તેષાં યદિ શિક્ષિતાઃ સ્મો
તદા કૃતઘ્નાત્ખલુ ધિગ્ધિગસ્માન્ ॥ ૬૭॥

દુર્ગતાન્વીક્ષ્ય યત્સ્વાન્તં દ્રવીભવતિ તત્ક્ષણાત્ ।
સ મહાત્મા સ્તુતેઃ પાત્રં નિર્વિકારસ્ત્વસજ્જનઃ ॥ ૬૮॥

પરોપકારઃ સત્કાર્યં યદ્યપિ સ્યાત્સકારણઃ ।
શિવજ્ઞાનાજ્જીવસેવા કાર્યં પુણ્યતમં પરમ્ ॥ ૬૯॥

ન કેવલં મૂર્તિષુ વિદ્યતે શિવઃ
પરં દરિદ્રેષુ ચ દુર્ગતેષુ ચ ।
શુભાકૃતિર્નિર્મલ ! તત્કૃતે કૃતા
સમર્ચના સારમતોઽવધાર્યતામ્ ॥ ૭૦॥

યાવજ્જીવસમષ્ટિકારણવશાદેકો મહાકાશવત્
યાવદ્વર્ગવિભિન્નજાતિષુ તતો યો દીનહીનેષુ ચ ।
યો દુષ્ટેષુ ચ દુઃખિતેષુ ચ પુનર્વ્યાપ્તઃ સમાનોઽનિશં
તસ્યારાધનહેતુના જનિતતૌ કષ્ટં સમીહે મહત્ ॥ ૭૧॥

પ્રેમ તથા નિઃસ્વાર્થતા
મયાનુભૂતં નિજજીવનેઽસ્મિ-
ન્નિર્વ્યાજમન્તઃકરણં નરાણામ્ ।
સદ્ભાવના શાશ્વતિકં ચ હાર્દં
જેતું જગત્સર્વમલં ત્રયં સ્યાત્ ॥ ૭૨॥

એકોઽપિ યુક્તસ્ત્રિગુણૈરમીભિઃ
સહસ્રશોઽપિ ચ્છલનાપરાણામ્ ।
નૃણાં પશૂનામપવિત્રમર્થં

ભવે ભવેન્નાશયિતું સમર્થઃ ॥ ૭૩॥

અસ્મદાશાવલમ્બોઽસ્તિ હીનદીનજનાઃ પરઃ ।
એત એવ નિતાન્તં હિ યાન્તિ વિશ્વાસપાત્રતામ્ ॥ ૭૪॥

વિશ્વાસસ્ત્વીશ્વરે કાર્યો ન ચ્છલેન પ્રયોજનમ્ ।
પરદુદુઃખૈર્દુઃખિતાનાં ભવેદીશઃ સહાયકૃત્ ॥ ૭૫॥

ભવ્યો નિઃસ્વાર્થભાવોઽત્ર સદાચારો વિભાવ્યતે ।
પરં સ્વાર્થપરત્વં ચ દુરાચારો વિચાર્યતે ॥ ૭૬॥

વસુના યશસા ચ વિદ્યયા
પ્રિયતાયાઃ સફલત્વમાપ્યતે ।
ચરિતેન સતા વિદાર્યતે-
ઽદમનીયા નનુ ભિત્તિરાપદામ્ ॥ ૭૭॥

સાફલ્યસ્ય રહસ્યં સ્યાદહમ્ભાવાન્નિવર્તનમ્ ।
તેન સિદ્ધ્યન્તિ કાર્યાણિ પ્રભાવોઽપિ મહાન્ભવેત્ ॥ ૭૮॥

વિસ્તારો જીવનં પ્રોક્તં સઙ્કોચો મૃત્યુરેવ ચ ।
સ્નેહ એવાસ્તિ વિસ્તારઃ સ્વાર્થઃ સઙ્કોચ ઉચ્યતે ॥ ૭૯॥

પ્રેમૈવ નો જીવનધર્મ એકો
યઃ સ્નિહ્યતિ પ્રાણિતિ સ પ્રકાશમ્ ।
યઃ સ્વાર્થસક્તઃ સ મૃતોઽસ્તિ જીવનં
સ્નેહેન મૃત્યુશ્ચિરજીવિતત્વમ્ ॥ ૮૦॥

ધાર્યતે યદ્વદસ્માભિ। શ્વાસોચ્છ્વાસેન જીવિતમ્ ।
તથૈવાહેતુકં પ્રેમ ભવેજ્જીવનકારણમ્ ॥ ૮૧॥

ચરિત્રહીનત્વમવાપ્ય લોકા
ધર્મં ગતપ્રાણમકાર્પુરદ્ય
અપાર્થહાર્દં ચરિતં ત્વપેક્ષ્યં
સૌહાર્દભાવઃ કુલિશપ્રભાવઃ ॥ ૮૨॥

પવિત્રતા ચેતસિ ધૈર્યમગ્ર્યં
તથા સ્વધર્માધ્યવસાયતા ચ ।
ગુણત્રયં સ્યાત્સફલત્વહેતુ-
સ્તથાપિ સર્વોપરિ હાર્દભાવઃ ॥ ૮૩॥

શિક્ષા

માનવાન્તઃસ્થિતાયાસ્તુ પૂર્ણતાયા વિકાસિતા ।
સચ્છિક્ષા પ્રોચ્યતે સદ્ભિર્નો ચેચ્છિક્ષા નિરર્થિકા ॥ ૮૪॥

યા સ્વાવલમ્બં ન દદાતિ શિક્ષા
"શિક્ષાભિધાનં" કથમાપ્નુયાત્સા ।
વિદ્યાર્થિનઃ પાઠગૃહેષ્વજીર્ણ-
રુજાધુનાક્રાન્તતયા વિશીર્ણાઃ ॥ ૮૫॥

સાધારણેષ્વથ પુનર્વનિતાસમાજે
શિક્ષાસમઃ કિમપરોઽસ્તિ પરોપકારઃ ।
વિદ્યાબલં પ્રસૃતમત્ર યદા પ્રતીચ્યાં
લોકોન્નતિઃ સમભવત્પરિતસ્તદાનીમ્ ॥ ૮૬॥

મસ્તિષ્કં પરિપૂરિતં યદિ ભવેદાવેદનારાશિભિઃ
સમ્બોધાનુભવૌ વિના પરિણમેત્તત્કેવલં સઙ્કુરે ।
સાઙ્કુર્યેણ ભવેદશક્તિરનિશં નાશોન્મુખી, ત્વં તતઃ
શિક્ષામાશ્રય સચ્ચરિત્રનરતાધીપાકવિદ્યાકરીમ્ ॥ ૮૭॥

સ્ત્રીશિક્ષા

ન સ્યાત્સ્ત્રીણાં સુધારેણ વિના સંસારમઙ્ગલમ્ ।
એકપક્ષાઃ પક્ષિણઃ કિમુડ્ડયન્તે વિહાયસિ ॥ ૮૮॥

સ્વોપજ્ઞમાર્ગૈર્મહિલાઃ સ્વકીયાઃ
કુર્વન્તુ સર્વાઃ સરલાઃ સમસ્યાઃ ।
નાન્યસ્તદર્થં યતતાં સ્ત્રિયઃ કિં
ન ભારતીયાઃ સુતરાં સમર્થાઃ ॥ ૮૯॥

સ્યાદાદ્યશક્તેર્જગતો જનન્યા
વિનોન્નતિં નોન્નતિરદ્ય નૃણામ્ ।
ઇત્યેવ હેતોઃ કિલ રામકૃષ્ણૈ-
ર્ગુરુકૃતા સ્ત્રી પરિપૂજિતા ચ ॥ ૯૦॥

સાવિત્રી દમયન્તી ચ સીતા ચ જનકાત્મજા ।
આદર્શભૂતાસ્તાઃ સન્તિ શ ૃણુ ભારત! ભારતોમ્ ॥ ૯૧॥

યસ્મિન્સમાજે કિલ ભારતીયે
    જગત્યસામાન્યગુણાન્વિતાયાઃ। ।
જાતા જનિઃ સા જનકાત્મજાયા
    જાનાતિ કર્તું લલનાદરં સા ॥ ૯૨॥

આસીત્ સ્ત્રીણાં જ્ઞાનલાભાધિકારઃ
    પૂર્વં કસ્માદદ્ય તા વઞ્ચિતાઃ સ્યુઃ ।
યદ્વત્ત્યક્તા બ્રાહ્મણૈરન્યવર્ણા-
    સ્તદ્વન્નાર્યશ્છિન્નસર્વાધિકારાઃ ॥ ૯૩॥

પૂર્વં ચાસીદગ્નિહોત્રાદિકાર્યે
    સાકં પત્યા સ્થિત્યપેક્ષા વધૂનામ્ ।
અદ્યત્વે તા હન્ત નાર્હન્તિ ગેહે
    શાલિગ્રામસ્પર્શમાત્રં વિધાતુમ્ ॥ ૯૪॥

કુત્રાપિ શાસ્ત્રે વિહિતં કિમસ્તિ
    "સ્ત્રી જ્ઞાનભક્ત્યોરધિકારશૂન્યા" ।
સીતા પદાઙ્કાનુકૃતિઃ પરં તત્
    સમુન્નતેરદ્ય વિશેષમાર્ગઃ ॥ ૯૫॥

નિન્દન્તિ નારીરનિશં નરા યે
    તાસાં કૃતે વિહિતં કિમસ્તિ ?
ક્ષિપ્તાઃ પરં તાઃ સ્મૃતિકારબાલૈઃ
    "સ્વાતન્ત્ર્યહીના" "નરકસ્ય પન્થાઃ" ॥ ૯૬॥

યદિ સ્યુર્ઘૃણિતાઃ કીટા ઇવ નાર્યસ્તતઃ કથમ્ ।
મનુનોક્તં યત્ર નાર્યઃ પૂજ્યન્તે તત્ર દેવતાઃ ॥ ૯૭॥

પાશ્ચાત્ત્યકૃત્યનુકૃતિર્યદિ ભારતસ્ય
    નારીજનેન વિહિતા ત્યજતા સ્વલક્ષ્યમ્ ।
તાભિઃ સહૈવ ભવિતાઽવનતિર્નરાણાં
    સર્વો ભવિષ્યતિ પુનર્વિફલઃ પ્રયત્નઃ ॥ ૯૮॥

ધર્મઃ

ન કોઽપિ ધર્મો "નરદિવ્યભાવં"
    યથોચ્ચકૈર્ગાયતિ હિન્દુધર્મઃ ।
સ એવ ચિત્રં બત! દુર્બલેષુ

પાદપ્રહાર કુરુતે નિતાન્તમ્ ॥ ૯૯॥

આદર્શેઽસ્મિઞ્જીવને માનવાનાં
શિક્ષા ભક્તિજ્ઞાનયોગત્રયસ્ય ।
ધર્માણાં સલ્લક્ષ્યમેતત્સમેષાં
વેદાન્તસ્તત્સિદ્ધયે સ્યાત્સમર્થઃ ॥ ૧૦૦॥

સ્પર્શાસ્પર્શૌ નાસ્તિ હિન્દુત્વચિહ્નં
સંસ્કારોઽયં કેવલં નિન્દનીયઃ ।
દૃષ્ટં નામ ક્વાપિ શાસ્ત્રપ્રમાણં
સામાજિક્યાસ્તૂન્નતેર્વિઘ્ન એષઃ ॥ ૧૦૧॥

ન ધર્મદોષોઽસ્ત્યથવાત્ર કોઽપિ
પાખણ્ડિનો યચ્છલનાપરાશ્ચ ।
પરાર્થનામ્ના વિવિધૈરુપાયૈઃ
પ્રતારયન્તિ ચ્છલશૂન્યચિત્તાન્ ॥ ૧૦૨॥

પુરાણધર્માત્તુ પુરોહિતાનાં
ત્યાગાદ્ભવેદુત્તમહિન્દુધર્મઃ ।
તેનાથ પાશ્ચાત્યસમાજવર્ગઃ
પ્રભાવિતઃ સ્યાદિતિ નિશ્ચયો મે ॥ ૧૦૩॥

ધર્મં વિનાસ્માકસમાજવર્ગો
ભવેદરણ્યં પશુભિર્વિકીર્ણમ્ ।
ભોગા વિલાસા ન મનુષ્યધર્મો
જ્ઞાનં પરં જીવનસાધ્યમુચ્ચૈઃ ॥ ૧૦૪॥

ધર્મસ્ત્વલૌકિકોપાયઃ પશુર્યેન નરાયતે ।
નરાશ્ચાપીશ્વરાયન્તે વિના ધર્મં નરઃ પશુઃ ॥ ૧૦૫॥

પ્રત્યક્ષં શાશ્વતં યત્પ્રકટયતિ પુનર્જીવનં માનવાનાં
જ્ઞાનાદજ્ઞાનસાન્દ્રં પશુમપિ મનુજં દ્રાક્કરોતિ પ્રભાવાત્ ।
તં સાક્ષાદીશ્વરેઽયં વિપરિણમયતિ સ્વેન્દ્રજાલાદિવાન્તે
ધર્મઃ કિં કિં ન કુર્યાજ્જગદુપકૃતયે કલ્પવૃક્ષેણ તુલ્યઃ ॥ ૧૦૬॥

સર્વગં પરમં તત્ત્વં નાસિ ચેદ્ દ્રષ્ટુમીશ્વરઃ ।
અધ્યાત્મજ્ઞાનસૂર્યસ્ય નોદયસ્તવ મન્દિરે ॥ ૧૦૭॥

ત્વયીશ્વરો યઃ સકલેઽપિ વિદ્યતે
    ન બુધ્યતે ચેદિયમજ્ઞતા તવ ।
સમગ્રમેકં યદિ ભિન્નતા કુતઃ
    પરં હિતત્વં પ્રતિ જીવમન્દિરમ્ ॥ ૧૦૮॥

“ઈશ્વરઃ ખલુ જગત્પિતા” સ્વયં
    પ્રાર્થનાસુ ભવતેદમુચ્યતે ।
પ્રત્યહં વ્યવહૃતૌ પરં પરં
    મન્યસે ન કિમિતિ સ્વબાન્ધવમ્ ॥ ૧૦૯॥

ત્વમંશભૂતોઽસ્યવિનાશિવસ્તુનઃ
    સમષ્ટિરેષાપ્યવિનાશિની મતા ।
અતઃ સ્વકીયાં પ્રકૃતિં વિભાવયન્
    સમષ્ટિસેવામિહ કર્તુમર્હસિ ॥ ૧૧૦॥

માનવે માનવે માન્યા દિવ્યતા યાદિતઃ સ્થિતા ।
પ્રકટીકરણં તસ્યા ધર્મ ઇત્યુચ્યતે બુધૈઃ ॥ ૧૧૧॥

નોચ્ચૈર્વાદા નાપિ સિદ્ધાન્તધારા
    નાપ્યસ્માકં ચારુનાનામતાનિ ।
ધર્મઃ, કિન્તુ સ્વાનુભૂતેરવાપ્તિઃ
    કિં ચૈતસ્યાઃ કાર્યજાતે પ્રકાશઃ ॥ ૧૧૨॥

મૂર્તિર્ગ્રન્થા મન્દિરે પ્રાર્થનાયાઃ
    સિદ્ધિપ્રાપ્ત્યૈ કેવલં સન્ત્યુપાયાઃ ।
સાક્ષાત્કારઃ સ્વાત્મનો દિવ્યતાયા
    ઉચ્ચૈર્ધ્યેયં યા હિ નિત્યં પુરસ્તાત્ ॥ ૧૧૩॥

યદા સન્તોષઃ સ્યાત્ક્ષણિકસુખતુચ્છેન જગતા
    ઘૃણા દૃષ્ટ્વા લોકે કપટપરિપૂર્ણા વ્યવહૃતિમ્ ।
યદા ચ દ્વેષઃ સ્યાદનૃતવચને નાસ્તિકજને
    તદા ધર્માપેક્ષં ભવતિ ખલુ સશ્રદ્ધહૃદયમ્ ॥ ૧૧૪॥

અવાપ્ય જ્ઞાનમીશસ્ય ચિન્તનં તસ્ય નિત્યશઃ ।
પ્રત્યક્ષં તેન સમ્ભાષા પ્રોચ્યતે ધર્મલક્ષણમ્ ॥ ૧૧૫॥

સ્નેહઃ સમ્પૂર્ણસંસારે સ્થિતપ્રાણિષુ નિર્મલઃ ।

ઉદારતા તથા તેષુ ધર્મસ્ય નિકષઃ સ્મૃતઃ ॥ ૧૧૬॥

પાવિત્ર્યં નિર્મલત્વં સુકૃતિતતિરતિઃ સર્વભૂતાનુકમ્પા
ધર્મસ્યૈકસ્ય સમ્પન્ન ખલુ સમભવન્ કિં ચ સર્વત્ર સન્તઃ ।
"અન્યે લુપ્યન્તુ ધર્મા મમ ભવતુ પુનઃ સર્વધર્મપ્રધાનો"
યદ્યેવં કોઽપિ વાઞ્છત્યખિલજનદયાપાત્રમેતં ધિગસ્તુ ॥ ૧૧૭॥

શ્રૂયતામધુના મિત્ર! ધર્મ-ભેદો વિનઙ્ક્ષ્યતિ ।
સર્વધર્મપતાકાસુ વચ્ચનં લિખિતં ભવેત્ ॥ ૧૧૮॥

"સહયોગો વિરોધો ન" "સ્વીકૃતિર્ન વિનાશનમ્" ।
"શાન્તિઃ સમન્વયશ્ચાપિ" "ન કલિર્ન મતે ભિદા" ॥ ૧૧૯॥

મતાનિ શાસ્ત્રાણિ ચ મન્દિરાણિ
ક્રિયાકલાપાઃ સમનુષ્ઠિતિશ્ચ ।
યદઙ્ગભૂતાનિ સ મુક્તિલાભો
ધર્મસ્ય સર્વસ્વમિદં બ્રુવન્તિ ॥ ૧૨૦॥

ધર્માશ્રયં ત્વં કલહં ન કુર્યા
અજ્ઞાનમૂલઃ કલહોઽનિશં સ્યાત્ ।
અસારતત્ત્વાશ્રયમેવ નૂનં
કિં ધાર્મિકસ્યાસ્તિ કલેર્ન બીજમ્ ॥ ૧૨૧॥

પાવિત્ર્યમાધ્યાત્મિકતા વિધાતું
સ્વં નીરસં દૂરમિતો યદૈવ ।
તદૈવ ધર્મે કલહા ભવન્તિ
ભવત્યશાન્તિશ્ચ જગત્યનન્તા ॥ ૧૨૨॥

ન વૈદિકાસ્તાન્ત્રિકાશ્ચ ન ચ વેદાન્તિનો વયમ્ ।
પૌરાણિકાસ્તથા ન સ્મઃ કેવલં "સ્પૃશ મા" વયમ્ ॥ ૧૨૩॥

ધર્મોઽસ્માકં શિષ્યતે પાકગેહે
દેવોઽસ્માકં પાકપાત્રસ્વરૂપઃ ! ।
ધ્યેયં ચાસ્તે "મા પવિત્રં સ્પૃશેર્મા"-
મિત્થં સર્વે સ્વાત્મનાશં વ્રજામઃ ! ॥ ૧૨૪॥

ધર્મોપદેશસ્તુ બુભુક્ષિતાનાં
વૈધેયતા સ્યાદથ વા પ્રમાદઃ ।

રિક્તોદરાણાં કિમુ ધર્મભાવઃ ?
ક્ષુત્પીડિતાંસ્તોષય ભોજનેન ॥ ૧૨૫॥

વ્યષ્ટેર્યથા જીવનલક્ષ્યમેકં
તથા સમષ્ટેરપિ નિશ્ચિતં સ્યાત્ ।
અઙ્ગીકૃતં ભારતવાસિભિર્ય-
લ્લક્ષ્યં પુરા તૈર્ન કૃતઃ પ્રમાદઃ ॥ ૧૨૬॥

વિવિધમ્

ભારતમહિમા

પ્રાચ્યાં તુ ભારતાદેવ સર્વં પ્રાચીનકાલતઃ ।
પ્રસસારાત્ર સંસારે પ્રીતિર્જ્ઞાનં તપઃ શિવમ્ ॥ ૧૨૭॥

ધર્મસ્યાવાસભૂમિઃ પ્રભવપદમિદં નિત્યશો દર્શનાનાં
નાનાવીરૈઃ સુધીરૈરવિરતમવનાત્સ્વસ્તિકાલાદનાદેઃ ।
વિશ્વપ્રેમપ્રકર્ષઃ પ્રકૃતિમધુરિમા માર્દવં ભાવનાના-
મેભિર્લોકસ્ય કર્તું પ્રભવતિ સતતં નેતૃતાં ભારતં નઃ ॥ ૧૨૮॥

આઘાતપ્રતિઘાતસઙ્કટશતૈરુદ્યત્સમાજપ્રથા-
ચારાણાં તતિભિશ્ચ સઙ્કુલમભૂદાક્રાન્તમેત્યારિભિઃ ।
આસ્તે પ્રાણબલાન્વિતં તદપિ યત્તુઙ્ગાદ્રિશૃઙ્ગોપમં
મન્યે ભારતજીવનં ખલુ જગત્યાદ્યન્તશૂન્યં ધ્રુવમ્ ॥ ૧૨૯॥

ન જ્ઞાતો ગ્રીસદેશોઽભવદવનિતલે રોમવાર્તાપિ નાસીત્
યૂરોપસ્થાશ્ચ લોકા ગહનવનગતા દીર્ઘમાસન્નસભ્યાઃ ।
ધ્વાન્તચ્છન્નેતિહાસં જગદિદમખિલં, દુર્બલા કિંવદન્તી
તત્રાસીદચ્ચશૈલસ્થિરતરવસતિઃ સંસ્કૃતિર્ભારતીયા ॥ ૧૩૦॥

આદર્શાનાં જન્મભૂર્વિશ્રુતાનાં
સદ્ભાવાનામાકરો ભારતં નઃ ।
અસ્માદેવાધ્યાત્મિકજ્ઞાનધારા-
પૂરઃ પૂર્વં પ્રસ્થિતૌઽભૂજ્જગત્યામ્ ॥ ૧૩૧॥

સંસારે પુનરપ્યસ્મિન્પૂરોઽયં પ્રસરિષ્યતિ ।
નવજીવનસઞ્ચારો ધ્રુવં યેન ભવિષ્યતિ ॥ ૧૩૨॥

કા પુણ્યભૂમિરુચિતા જગતીતલેઽસ્મિન્

કિં સ્થાનમત્ર પરમીશ્વરલાભસિદ્ધ્યૈ ? ।
નૃણાં ચ કર્મફલભોગપદં કિમાસ્તે ?
તત્રોત્તરં શૃણુત ભારતભૂરિયમ્ ॥ ૧૩૩ ॥

ક્ષેત્રં કિમસ્તિ બલશીલદયાગુણાના-
મન્તર્દૃશોઽપ્યજનિ યત્ર પરો વિકાસઃ ।
જાતા ચ યત્ર પરમાત્મવિચારચર્ચા
તત્રોત્તરં શૃણુત ભારતભૂરિયં નઃ ॥ ૧૩૪ ॥

મહામહિમમણ્ડિતા ભવતિ ભારતી ભૂઃ પુરા
સમુજ્જ્વલતરા ધ્રુવં સ સમયોઽચિરાદેષ્યતિ ।
ગૃહીતજનુષોઽત્ર સંશ્રુતમહર્ષયઃ પૂર્વવત્
સમગ્રજગતો જનાન્ સુપથગાન્વિધાસ્યન્તિ તે ॥ ૧૩૫ ॥

(બન્ધુસેવા)
આનન્દિતા ભવત બાન્ધવસેવનાર્થં
યુષ્માભિરેવ મધુરોઽવસરોઽદ્ય લબ્ધઃ ।
આપ્લાવિતં ત યેન જગત્સમગ્રં
વૃદ્ધિં સ યાતિ ખલુ ધર્મસમુદ્રપૂરઃ ॥ ૧૩૬ ॥

નિઃસ્વાન્નિત્યં દુઃખિતાનીશપુત્રાન્
યે સેવન્તે પાપિનસ્તાપિનશ્ચ ।
તેષાં જિહ્વાગ્રસ્થિતા ભારતી સ્યાદ્
દેવી ચાસ્તે માનસે શક્તિરૂપા ॥ ૧૩૭ ॥

પરાર્થં ત્યક્તસર્વસ્વો મુક્તસ્તિષ્ઠતિ માનવઃ ।
ઇતો ભ્રષ્ટસ્તતો ભ્રષ્ટો "મુક્તિર્મે સ્યાદિતિ બ્રુવન્" ॥ ૧૩૮ ॥

(ધર્મમહત્તા)
ધર્મઃ પરો ભારતપુણ્યભૂમૌ
જાતીયશક્તેરવલમ્બરૂપઃ ।
દેશસ્ય નો જીવનગીતશાસ્ત્રે
ધર્મઃ પ્રધાનસ્વરતામુપૈતિ ॥ ૧૩૯ ॥

નાર્હા વયં ત્યક્તુમતઃ સ્વધર્મ-
માદર્શભૂત-સ્વબલં કદાપિ ।
અસાવધાના યદિ તં ત્યજેમ

પ્રતિક્રિયા તસ્ય ભવેદદમ્યા ॥ ૧૪૦॥

(ભારતસ્ય અવનતિઃ)

યસ્મિન્દિને “મ્લેચ્છ”પદં પ્રસિદ્ધં
છિન્નં વિજાતીયજનૈઃ સખિત્વમ્ ।
તસ્મિન્દિને ભારતભાગ્યસૂર્યો-
ઽપ્યસ્તાચલં ગન્તુમિવ પ્રવૃત્તઃ ॥ ૧૪૧॥

(કર્મ અકર્મ ચ)

આત્મભાવવિકાસસ્ય કારણં કર્મસંજ્ઞિતમ્ ।
અનાત્મભાવો યેન સ્યાત્ તદકર્મેતિ સંસ્મૃતમ્ ॥ ૧૪૨॥

સબલાઃ કાર્યકર્તારો વિશ્વં જેતુમલં દશ ।
સહસ્રશોઽપિ વૈધેય ન સમર્થા ભવન્તિ તે ॥ ૧૪૩॥

પશુનરત્વમાપ્નોતિ સત્કર્મવશતઃ પરમ્ ।
નરઃ પશુત્વં લભતેઽસત્કર્મવશતોઽવશઃ ॥ ૧૪૪॥

(સ્ત્રી-મહિમા)

જાતાન્યજાતિષુ જગત્યબલોન્નતિર્યા
સા યોષિતાં કિલ સુયોગ્યપદસ્ય લાભાત્ ।
યાધોગતિશ્ચિરમભૂદિહ ભારતેઽસ્મિન્
સા શક્તિરૂપમહિલાસુ નિરાદરેણ ॥ ૧૪૫॥

(માનવોન્નતિઃ)

સમાનાધિકારા જના જીવને સ્યુઃ
પરં દુઃખિતા જન્મતો જાતિભેદાત્ ।
અતઃ કર્મણો વર્ણ ઇત્યેવ સત્યં
સમાજોન્નતાવસ્તિ ધર્મોચ્ચતત્ત્વમ્ ॥ ૧૪૬॥

અયિ! કઠોરતરં ખલુ જીવનં
તનુતરં ક્ષણજીવિ ચ તત્ફલમ્ ।
પિહિતમસ્તિ તવાગ્રમથાપ્રભં
તદપિ ધીરતયાગ્રસરો ભવેઃ ॥ ૧૪૭॥

ઉત્તિષ્ઠ જાગૃહિ દ્રાક્ત્વં સ્વપ્નેનાલં તવાધુના ।
સ્વલક્ષ્યપ્રાપ્તિપર્યન્તમુદ્યમં ન પરિત્યજેઃ ॥ ૧૪૮॥

સહાનુભૂતેરથ કાર્યશક્તે-
    રભાવ એવાસ્તિ વિપન્નિદાનમ્ ।
દોષં તમાદૌ પરિહૃત્ય શીઘ્રં
    કુરુષ્વ કાર્યક્ષમમાત્મદેહમ્ ॥ ૧૪૯॥

અસીમશક્તિર્નિહિતા શિવેન
    વ્યક્તૌ, વિજાનાતિ નરઃ કથં તામ્ ।
સર્વેઽપિ તુલ્યાવસરં લભન્તાં
    બલીયસીતઃ પરમેશ્વરેચ્છા ॥ ૧૫૦॥ ।

વિજયઃ પ્રકૃતેરસ્યા મુખ્યં લક્ષ્યં નૃજન્મનઃ ।
ન જાતો મનુજો જાતુ ગન્તું પ્રકૃતિદાસતામ્ ॥ ૧૫૧॥

સશ્રદ્ધકર્મઠજનસ્ય સસીમબુદ્ધ્યા
    વિજ્ઞાનભૌતિકવિચારવશાલતાયાઃ ।
કર્તું સમન્વયમહં હૃદયં સમીહે
    ગમ્ભીરમબ્ધિરિવ યચ્ચ નભો વિશાલમ્ ॥ ૧૫૨॥

સુખં નરાણાં પુરતોઽભ્યુપૈતિ
    પ્રાયો વિપચ્છેખરિતોત્તમાઙ્ગમ્ ।
પ્રયોજનં યસ્ય સુખેન તસ્મા-
    ત્સ તત્પરઃ સ્યાદ્વિપદોઽનુગન્તમ્ ॥ ૧૫૩॥

કલ્યાણમધ્યાત્મસમાજનીતિ-
    ત્રયેઽવલમ્બેત વિશુદ્ધભાવમ્ ।
સર્વેષુ દેશેષ્વથ સર્વકાલે-
    ષ્વભિન્નતા સ્માસુ ચ બાન્ધવેષુ ॥ ૧૫૪॥

(જ્ઞાનમહિમા)
ગમ્યમુચ્ચતમં તત્ત્વં જીવનસ્ય શ્રુતં સ્મૃતમ્ ।
તત્ત્વમન્વેષય ભ્રાતઃ! ધ્રુવં લાભો ભવિષ્યતિ ॥ ૧૫૫॥

જ્ઞાનં પરં પ્રતિગૃહં પ્રવિશેદિતીત્થં
    ચક્રં પ્રવર્તયિતુમિચ્છતિ માનસં મે ।
યેન સ્ત્રિયશ્ચ પુરુષાશ્ચ જગત્યમુષ્મિન્ ।
    સ્વાત્મેષુનિર્ણયવિધિં પરિભાવયન્તુ ॥ ૧૫૬॥

(સેવાભાવઃ)
યથાહં ભારતીયોઽસ્મિ તથા સંસારસેવકઃ ।
સન્દેહકલ્પનાજાલપ્રસારોઽત્ર નિરર્થકઃ ॥ ૧૫૭॥

(સદાચારઃ)
આચારવાન્ ભવ સુહૃદ્ બલવાન્કૃતાન્ત-
 સ્યાહ્વાનતોઽપિ ગતભીરમલાન્તરસ્ત્વમ્ ।
વ્યર્થૈવ ધાર્મિકવિવાદપરમ્પરાઽઽસ્તે
 દુષ્કર્મજાતમિતિ કાતરકાર્યમેતત્ ॥ ૧૫૮॥

(સત્યં ઉપકારશ્ચ)
અપકારાદુપકારોઽસત્યાદપિ ચાતિરિચ્યતે સત્યમ્ ।
અનન્તગુણમેતત્ખલુ યસ્યાસ્તે તસ્ય જીવિતં સફલમ્ ॥ ૧૫૯॥

(ભારતોન્નતિઃ)
ભારતાભ્યુદયોઽવશ્યં ભવિતેશવિધાનતઃ ।
અરુણોદયવેલાસાવુત્થાતવ્યં ગતા નિશા! ॥ ૧૬૦॥

(બલમહત્તા)
શુષ્કાદ્ ગીતાપાઠાત્પદકન્દુકખેલનં તુ ભદ્રતરમ્ ।
શક્તેર્મહત્યપેક્ષા, ગીતાપઠનં ભવેત્તતઃ સફલમ્ ॥ ૧૬૧॥

(વ્યક્તિમહત્તા)
ભ્રાતસ્ત્વમેહિ બલવાનનુભૂય "સોહં"
 ભસ્મીભવિષ્યતિ મનોમલિનત્વમસ્માત્ ।
જાગર્તિ શક્તિરનિશં ત્વિહ યા પ્રસુપ્તા
 ત્વં ચ પ્રચણ્ડદલમૂર્તિરિવ સ્વયં સ્યાઃ ॥ ૧૬૨॥

(દલિતવર્ગઃ)
શ્રમિકા ભારતસ્યૈતે દલિતાશ્ચિરકાલતઃ
અપૂર્વકાર્યકર્તારોઽપ્યહં તાનભિવાદયે ॥ ૧૬૩॥

દરિદ્રાણાં કુટીરેષુ ભારતં વસતિ ધ્રુવમ્ ।
પરમુન્નતયે તેષામસ્માભિર્વત કિં કૃતમ્ ? ॥ ૧૬૪॥

સાંસારિકેષુ વિષયેતષુ ભવન્ત્યસુજ્ઞા
 નિઃસ્વા જનાસ્તદપિ દુર્જનતાવિહીનાઃ ।

તે સન્તિ શ્રદ્ધહૃદયાશ્છલશૂન્યભાવા
    હિંસાવિચારરહિતા હિતકાર્યસક્તાઃ ॥ ૧૬૫॥

નિમ્ના જના જેતૃનિપીડનેન
ત્રસ્તાઃ સ્વકીયૈરવમાનિતાશ્ચ ।
ચિરાત્સ્વકાર્યપ્રસિતાસ્તથાપિ
    શ્રમસ્ય નાપુઃ ફલમદ્ય યાવત્ ॥ ૧૬૬॥

(પુરાણાભિમાનઃ)
કેચિદ્વદન્ત્યવનતેઃ કિલ કારણં નો
    વ્યર્થં મમત્વમતિપૂર્વપરમ્પરાસુ ।
જ્ઞાતં મયા પરમિદં વિપરીતમેવ
    ત્યાગઃ પુરાણવિભવસ્ય મહાન્પ્રમાદઃ ॥ ૧૬૭॥

(હનૂમદાદર્શઃ)
સર્વદાસ્તુ તવાદર્શો હનૂમાન્બલવાન્સુધીઃ ।
જીવિતં મરણં વાસ્તુ સ ન દધ્યૌ જિતેન્દ્રિયઃ ॥ ૧૬૮॥

(જ્ઞાની ભક્તશ્ચ)
અગાધપ્રેમહૃદયોઽદ્વૈતાનુભવવાન્સ્વયમ્ ।
જ્ઞાનીશ્વરેણ તાદાત્મ્યવાંશ્ચ ભક્તો નિગદ્યતે ॥ ૧૬૯॥

નિન્દકો જ્ઞાનિનો ભક્તો જ્ઞાની ભક્તસ્ય નિન્દકઃ ।
દ્વાવપ્યેતૌ મતૌ ધૂર્તૌ ન ભેદો જ્ઞાનિભક્તયોઃ ॥ ૧૭૦॥

(ઈશ્વરઃ)
યદીશ્વરસ્ય સત્તાયાં વિશ્વાસો વિદ્યતે તવ ।
પદે પદે તત્સ્મૃતિઃ સ્યાત્સ્મૃતિરેવેશસેવન ॥ ૧૭૧॥

યદીશ્વરઃ સ્યાન્નરદેહધારી
    હાનિર્ભવેત્કિં તદનન્તશક્તેઃ ?
ચૈતન્યરૂપસ્ય શરીરલાભો
    ન બાધકઃ સ્યાત્તદનન્તતાયામ્ ॥ ૧૭૨॥

(ભક્તિઃ)
ભક્તિર્નિરન્તરમસૌ મનુજાન્તરસ્થા
    યા કામકાઞ્ચનપિધાનવશાદદૃશ્યા ।

દૂરીકુરુ ત્વમિદમાવરણં ક્ષણેન
    સ્વાન્તઃ સ્થિતાથ ભવતિ સ્વયમેવ દૃશ્યા ॥ ૧૭૩॥

(બન્ધઃ)
સૌવર્ણો વાપ્યાયસો વાસ્તુ બન્ધ-
    શ્છેદ્યો, દ્વન્દ્વં દ્વેષરાગાદ્યપાસ્યમ્ ।
હૈમો બન્ધોઽપ્યસ્તુ તુલ્યઃ કઠોરો
    દાસો દાસઃ પૂજિતસ્તાડિતો વા ॥ ૧૭૪॥

(મુક્તિઃ)
અન્વેષ્ટવ્યા કુત્ર મુક્તિઃ સખે! સા
    લભ્યા નેહામુત્ર વા માન્દિરે વા ।
શાસ્ત્રગ્રન્થે વા ન મા દુઃખિતો ભૂ
    ર્યસ્માદેકસ્ત્વં તદાલમ્બભૂભિઃ ॥ ૧૭૫॥

(ઉપાસના)
અનુષ્ઠાનાનિ શાસ્ત્રાણિ સમ્પ્રદાયાસ્તથૈવ ચ ।
સાક્ષાત્કારસ્ય સિદ્ધ્યર્થં સાધનાનીવ કેવલમ ॥ ૧૭૬॥

(અહમ્ભાવઃ)
દેહમાનસસંયોગાદહમ્ભાવોદ્ભવો ભવેત્ ।
“જાનામી”ત્યુપલબ્ધિસ્તુ પ્રમાણં સ્યા”દહં”સ્થિતૌ ॥ ૧૭૭॥

(વેદમહત્તા)
દૃષ્ટો વિરોધો યદિ વેદવાક્યૈઃ
    શાસ્ત્રં પુરાણં ન ભવેત્પ્રમાણમ્ ।
વિશ્વેઽત્ર વેદાનનુભાસિતં ય-
    જ્જાનીહિ વેદોદ્ભવમેવ સર્વમ્ ॥ ૧૭૮॥

(શિક્ષાપ્રચારઃ)
શિક્ષા-સંસ્થા-માધ્યમેન પ્રચારઃ
    કર્તવ્યઃ સ્યાલ્લોકસાધારણેન ।
ગત્વા પશ્ચાત્તૈરિતઃ પ્રત્યગારં
    બોદ્ધવ્યાઃ સ્યુર્બાન્ધવા નિર્ધનાસ્તે ॥ ૧૭૯॥

(મૂર્તિપૂજા)
સાક્ષાદિયં ચેન્ન વિમુક્તિહેતુ-

સ્તથાપિ નિન્દ્યા ન હિ મૂર્તિપૂજા ।
અદ્વૈતબોધાગમસાધ્યસિદ્ધિ-
યોગ્યં મનઃ સા કુરુતે જનાનામ્ ॥ ૧૮૦॥

(અધ્યાત્મમ્)
નરસ્ય દિવ્યાં પ્રકૃતિં પુરસ્તા- ૦
દુધ્દાર્ય્ય તજ્જીવનકાર્યવૃન્દે ।
પ્રવેશનીયં કથમિત્યુપાયઃ
સઙ્ક્ષેપતો લક્ષ્યમિદં મદીયમ્ ॥ ૧૮૧॥

અધ્યાત્મતત્ત્વવિભવસ્ય ભુવિ પ્રસારો
નિત્યં વિધેય ઇતિ ભારતધર્મકાર્યમ્ ।
યદ્ગ્રીક-હૂણ-શક-મોઘલ-તુર્કયાનૈઃ
સમ્પીડિતં ભવદપિ સ્થિરસંવિદાસ્તે ॥ ૧૮૨॥

વૈજ્ઞાનિકાવિષ્કૃતિમાત્રમસ્મિન્
કથં જગત્યર્હતિ સભ્યતાખ્યામ્ ।
મનુષ્યજાતૌ કિયતીશ્વરસ્ય
વ્યક્તિઃ પ્રમાણં ખલુ સભ્યતાયાઃ ॥ ૧૮૩॥

આત્માવ્યક્તબ્રહ્મ સર્વોઽપિ બાહ્યઃ
સ્વાન્તઃસંસ્થો યઃ પ્રકૃત્યન્તરાયઃ ।
તં સંયમ્ય બ્રહ્મભાવપ્રકાશો
લક્ષ્યં લોકે જીવનસ્યોચ્ચમાસ્તે ॥ ૧૮૪॥

કર્મોપાસ્તિજ્ઞાનચેતોજયાના-
મેકોપાયેનાથ વા તૈરનેકૈઃ ।
વ્યક્તીકૃત્ય સ્વાત્મનો દિવ્યરૂપં
મુક્તેર્લાભં કર્તુમર્હસ્યનન્તમ્ ॥ ૧૮૫॥

નય ત્વં મામમ્બ! ત્વરિતમતિદીપ્રં પરપદં
નિશાનાથો યસ્મિન્દ્યુમણિરપિ ખદ્યોતસદૃશઃ ।
વૃથા સ્વપ્નાનેતાંસ્તિરય મમ લીલાન્તસમયે
વિભિદ્યેદં દીર્ઘં નિગડમધુના મોચય સુતમ્ ॥ ૧૮૬॥

વ્યષ્ટિઃ પરં બ્રહ્મ વિભાગ શૂન્યં
માયાવશાદેવ પૃથક્ત્વમેતિ ।

માયાપિ ચૈકીભવિતું સ્વભાવા-
ત્તદ્ભેદશૂન્યં યતતે પ્રયાતુમ્ ॥ ૧૮૭॥

“અહં” પૂર્ણશક્તિપ્રકાશસ્વરૂપં
તથા ભાવનેયં જનનૈ”ર્જ્ઞાન”મુક્તમ્ ।
સ્વરૂપં તુ સાપેક્ષમેતેન સિદ્ધ્યે-
દપેક્ષાયુતા શુદ્ધસંવિત્કૃતઃ સ્યાત્ ?॥ ૧૮૮॥

જ્ઞાનાતીતા પૂર્ણતા સત્સ્વભાવા
જ્ઞાનાજ્ઞાને પૂર્ણતાંશસ્વરૂપે ।
સાપેક્ષત્વં પૂર્ણતાતોઽસ્તિ નીચૈ-
રજ્ઞાનેન જ્ઞાનમેતાદૃશં સ્યાત્ ॥ ૧૮૯॥

બન્ધનાત્સદસતોર્વિમોચનં
મુક્તિરિત્યભિહિતા મનીષિભિઃ ।
અસ્તુ હૈમમથવાપ્યયોમયં
વસ્તુતસ્તુ નિગડં તદુચ્યતે ॥ ૧૯૦॥

માયા સાદિરનાદિર્વા સાન્તા સા વ્યષ્ટિરૂપતઃ ।
સમષ્ટિરૂપતોઽનન્તા તથાનાદિશ્ચ મન્યતે ॥ ૧૯૧॥

વસ્ત્વેકમેવ ન દ્વૈતં ચૈતન્યં વાપ્યચેતનમ્ ।
અજ્ઞાનાખ્યા પરં માયા દ્વૈતભેદકરી ભવેત્ ॥ ૧૯૨॥

આદૌ યદા સ્યાદ્વિષયાક્ષયોગો
ન દ્વૈતબોધસ્ય તદાવકાશઃ ।
ક્ષણે દ્વિતીયે સવિકલ્પભાનં
સત્યાદિસંવિત્ખલુ નિર્વિકલ્પા ॥ ૧૯૩॥

ઘનાન્ધકારઃ પરિતો વિસર્પન્
દૃષ્ટિં વિલુમ્પન્નયમન્તમેતુ ।
મૃત્યોર્ન યન્મૃત્યુમથાભિલાષઃ
“સ્વ”-નાશકો નશ્યતુ દીર્ઘશાન્ત્યૈ ॥ ૧૯૪॥

એકો મુક્તઃ સર્વવેદ્યસ્ય વેત્તા,
નામ્ના રૂપેણાપિ હીનઃ સમાનઃ ।
સાક્ષી સર્વસ્વપ્રજાતસ્ય બીજં

માયાધારો વિશ્વરૂપોઽયમાત્મા ॥ ૧૯૫॥

તાતો માતા પુત્રજાયે ચ મિત્રં
સ્વપ્નં સર્વં નાસ્તિ કિઞ્ચિદ્યથાર્થમ્ ।
યદ્યેકસ્ત્વં કઃ પિતા કશ્ચ મિત્રં
ત્વત્તો ભિન્નં નાસ્તિ સર્વં ત્વમેવ ॥ ૧૯૬॥

આધ્યાત્મિકત્વં ખલુ નઃ સમાજે
રક્તપ્રવાહોઽમલજીવનસ્ય ।
ઓજોઽન્વિતો યાવદસૌ પ્રવાહો
નિષ્કણ્ટકસ્તાવદયસ્ય પન્થાઃ ॥ ૧૯૭॥

ન કોઽપ્યભાવઃ પરિપીડયેન્નો
દરિદ્રતા માનસદુર્બલત્વમ્ ।
અધ્યાત્મધર્માશ્રયતાસ્તિ યાવ-
ન્નાશોન્મુખં સ્યાત્કિમુ ભારતં નઃ ॥ ૧૯૮॥

શુદ્ધોઽસિ પૂર્ણોઽસિ બલાન્વિતોઽસિ
યદસ્તિ પાપં ન તવાસ્તિ કિઞ્ચિત્ ।
દૌર્બલ્યચિન્તા ન સખે વિધેયા
પ્રત્યાત્મસંસ્થં બલમાવિરસ્તુ ॥ ૧૯૯॥

કદાપ્યુચ્ચૈર્ગચ્છન્સમયજલધેર્વીચિવશતો
લુઠન્નીચૈસ્તૂર્ણં તદપિ નિજધારામનુસરન્ ।
ઇતઃ શ્રાન્તો માતઃ ક્ષણિકસુખદુઃખાત્મજગત-
સ્તથા દૂરાદ્ દ્રષ્ટું પરમપરતીરં ત્વપરતઃ ॥ ૨૦૦॥

(જનતાજનાર્દનઃ)

ત્વત્સમ્મુખો વિવિધરૂપધરો ય ઈશ-
સ્તં સન્ત્યજન્નુ કુહ માર્ગયસે વૃથૈવ ।
યઃ સ્નેહતત્પરમનાઃ ખલુ જીવવૃન્દે
જાનાતિ સેવિતુમસાવનિશં પરેશમ્ ॥ ૨૦૧॥

(સ્વામિજીવનલક્ષ્યમ્)

જીર્ણં વસ્ત્રમિવ ત્યજામિ સુખતસ્તૂર્ણં સ્વકીયં વપુઃ
પૂર્ણં કર્તુમથાપિ કાર્યમનિશં લોકે યતિષ્યે ધ્રુવમ્ ।
યાવદ્બ્રહ્મમયં સમગ્રમિતિ ન જ્ઞાનં જગત્યાં જનૈઃ

તાવત્પ્રેરયિતું પ્રયત્નપરતા મન્યે મદીયં તપઃ ॥ ૨૦૨॥

(સમર્પણમ્)
સ્વામિશબ્દૈર્વિરચ્યેદં નવ્યં શ્લોકશતદ્વયમ્ ।
ત્વદીયં વસ્તુ ભગવન્! તુભ્યમેવ સમર્પયે ॥ ૨૦૩॥

ઇતિ સાહિત્યાચાર્ય-એમ્૦એ૦-ભણ્ડારકરોપાહ્વ ત્ર્યમ્બકશર્મણા
વિરચિતા શ્રીસ્વામિવિવેકાનન્દોપદેશદ્વિશતી સમાપ્તા ।

Encoded and proofread by Sunder Hattangadi

*Advice of Swami Vivekananda (200)*
pdf was typeset on November 22, 2022

Please send corrections to *sanskrit@cheerful.com*